# Shri Krishnarjunabhyam Kritam Rudra Stotram

# श्रीकृष्णार्जुनाभ्यां कृतं रुद्रस्तोत्रम्

## Document Information

Text title : Shri Krishnarjunabhyam Kritam Rudra Stotram

File name : kRRiShNArjunAbhyAMkRRitaMrudrastotram.itx

Category : shiva, mahAbhArata, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | droNaparva | adhyAya 57/49-58||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# श्रीकृष्णार्जुनाभ्यां कृतं रुद्रस्तोत्रम्

नमो भवाय शर्वाय रुद्राय वरदाय च ।
पशूनां पतये नित्यमुग्राय च कपर्दिने ॥ ४९॥

महादेवाय भीमाय त्र्यम्बकाय च शम्भवे ।
ईशानाय भगघ्नाय नमोऽस्त्वन्धकघातिने ॥ ५०॥

कुमारगुरवे नित्यं नीलग्रीवाय वेधसे ।
विलोहिताय धूम्राय व्याधायानपराजिते ॥ ५१॥

नित्यं नीलशिखण्डाय शूलिने दिव्यचक्षुषे ।
हन्त्रे गोप्त्रे त्रिनेत्राय व्याधाय वसुरेतसे ॥ ५२॥

अचिन्त्यायाम्बिकाभर्त्रे सर्वदेवस्तुताय च ।
वृषध्वजाय पिङ्गाय जटिने ब्रह्मचारिणे ॥ ५३॥

तप्यमानाय सलिले ब्रह्मण्यायाजिताय च ।
विश्वात्मने विश्वसृजे विश्वमावृत्य तिष्ठते ॥ ५४॥

नमो नमस्ते सेव्याय भूतानां प्रभवे सदा ।
ब्रह्मवक्त्राय शर्वाय शङ्कराय शिवाय च ॥ ५५॥

नमोऽस्तु वाचस्पतये प्रजानां पतये नमः ।
नमो विश्वस्य पतये महतां पतये नमः ॥ ५६॥

नमः सहस्रशिरसे सहस्रभुजमन्यवे ।
सहस्रनेत्रपादाय नमोऽसङ्ख्येयकर्मणे ॥ ५७॥

नमो हिरण्यवर्णाय हिरण्यकवचाय च ।
भक्तानुकम्पिने नित्यं सिध्यतां नौ वरः प्रभो ॥ ५८॥

एवं स्तुत्वा महादेवं वासुदेवः सहार्जुनः ।
प्रसादयामास भवं तदा ह्यस्त्रोपलब्धये ॥ ५९॥

इति महाभारते द्रोणपर्वणि ५७ अध्यायान्तर्गतं
श्रीकृष्णार्जुनाभ्यां कृतं रुद्रस्तोत्रं सम्पूर्णम् ।

महाभारत । द्रोणपर्व । अध्याय ५७/४९-५८॥

mahAbhArata . droNaparva . adhyAya 57/49-58..

Proofread by PSA Easwaran

---

*Shri Krishnarjunabhyam Kritam Rudra Stotram*
pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*